नीहारे तरळो भाति श्वापदे भाति नूपुरः ।
दुमाश्च सवने युक्तं दीर्घनिश्वासवर्जनात् ।। 109 ।।

नीहार इति - दीर्घनि (इत्युक्ते नी वर्णः) श्वा-स इति वर्णत्रयस्य क्रमेण वर्जने सति, हारे-पदे-वने इति भवति एवं च अर्थस्सङ्गतः (तरलो हार मध्यग इति अमरः)

वसुदेवसुतो दुरालयाशी वलयाद्वनिता विनष्टभोगा ।
रणतो हि रणं विभाति पूर्वं विधवागमनान्न कापि हानिः ।। 110 ।।

वसुदेवेति-पूर्वं वि-ध-वा इत्यक्षरत्रयस्य प्राप्तौ विदुरालयाशी (वसुदेवसुतः) - धवलयात् (वनिता विनष्टभोगा) वारणतः (हि रणं विभाति) इति भवति । विधवः-गुरूडः तदागमनात्-गरूडदर्शने सति न कार्यक्षतिः इत्यर्थान्तरध्वनिरपि बोध्याम् ।

अजाकारोऽपि जामाता मातैव स्याद्यतस्ततः ।
जामाता ज्ञानशून्योऽपि पूजयते स्यालकादिभिः ।। 111 ।।

अजेति-'जामाता' अपगतजाकारश्चेत् 'माता' भवति । तस्मात् पूज्यत इत्यर्थः । जामाता अजाकारोऽपि-ज्ञानयशून्योऽपि माता भवति । स्यालस्य स्वमातृप्रीतिविषयत्वेन मातृतुल्यो भवति । स्वमातृप्रीत्यर्थं स्यालः जामातरं पूजयतीत्यर्थः । जामातुः मूर्खत्वेऽपि तस्मिन् श्वश्रूप्रीतिः अधिकेति लोकसिद्धोऽयं अर्थे विशेषोऽपि ध्वन्यते ।

अतिप्रतिभया लसत्यनघ भूषणानां गणः विकारसहितद्रुमप्रतिभटोधरस्ते ध्रुवम् ।
अनन्तपुरुषादरस्तव विभाति लीलाविधा वतस्तवमनो मया विमुखहारसक्तं कुरु ।। 112 ।।

अतीति-प्रतिभायाः अतित्वे-'ति' इति वर्ण शून्यत्वे प्रभा इति भवति ।
एवञ्च भूषणगणः प्रभया लसति । 'द्रुमस्य' विकार साहित्ये विद्रुम इति भवति । एवं च अधरः विद्रुमप्रतिभटः । 'पुरुष' शब्दस्य अनन्तत्वे-अन्त्याक्षर राहित्ये 'पुरु' इति भवति । लीलविधौ तव अधिकादरः (विभाति) (विमुखे) 'वि' इत्यक्षरं मुखे - मुखभागे यस्य स विमुखः स चाऽसौ हारः - विहार इत्यर्थः । एवञ्च मया सह विहरेति भावः । (पुरूहूः पुरू भूयिष्टं स्फांर भूयश्च भूरि च इति अमरः)

मायायाश्च पिशाचस्य नरकस्याऽपि च क्रमात् ।
अन्त्याक्षराणि संगृह्य याचकं विदधे विधिः ।। 113 ।।

संतापात् सागराच्चाऽपि रक्षसश्च चतुर्मुखः ।
आद्याक्षराणि संगृह्य संसारं कृतवान् क्रमात् ।। 114 ।।

अमध्यसारो मकरन्द आसीत् अत्येवमत्रातिरसं च जातम् ।
सुधैव जाताऽत्र सुधाऽपि बाले प्रकाश्यते चेत् तव वाग्रसेस्मिन् ॥ 115 ॥

अमध्येति - मकरन्द इत्यस्य अमध्यत्वे मध्यवर्णद्वयराहित्ये 'मन्द' इति भवति । एवं च मकरन्दः मन्दसार आसीत् । अतिरसं - तदाख्यं भक्ष्ययम् अतिजातं - 'ति' कारशून्यं जातं - (अतिरसं) अरसं जातं । सुधा- अमृतं सुधैव जाता - गृहादि लेपनार्था या सुधा सैव जातेत्यर्थः ।

मुखसदृशं तामरसं यदिह जगत्यान्तु वर्ण्यते कविभिः ।
मुखसयुतं भवति हि तत् सुमुखि मुखे ते विलोकिते सद्यः ॥ 116 ॥

मुखेति-स्त्रीमुखसदृशं यद्वर्ण्यते तत् तामरसं - तव मुखे विलोकिते सति, मुखसयुतं - मुखभागे 'स' युतं सकारयुक्तं भवति - सतामरसं भवति - विदुषां हेयं भवतीति भावः ।

बाले त्वदीयाऽऽस्यरुचीच्छयैष काले तु कस्मिंश्चिदचूचरत् ताम् ।
तदैव तस्मात् विपरीताकारा निशान्तमिन्दुर्विधिनैव नीतः ॥ 117 ॥

बाल इति - कस्मिंश्चित् काले सकलकलापूर्णत्वसमये, विपरीतकारा निशान्तम्- उपद्रवसहितकारागृहमित्यर्थः । चोरस्य कारागृहप्राप्तिः युक्तेति भावः । 'कारा' शब्दस्य विपरीतत्वे 'राका' इति भवति । पूर्णिमा दिनरात्रिमध्यभागं भजतीति वास्तवार्थः ।

सुगत्यगो भवत्यगो मुखे गजस्सुभाषिणि ध्रुवं शुकोऽपशुर्मुखे भवत्यवाप्तदीर्घकः ।
अगो भवत्यगोन्ततोनुगो वरस्तनि प्रिये गतिर्वचस्तनौ यदि प्रकाशिता मनोहरे ॥ 118 ॥

सुगतीति - तव गतिः गमनं प्रकाशितंचेत् गजः अगस्सन् - 'ग' कार शून्यस्सन् मुखे-मुखभागे अगो भवति - 'अकारं प्राप्तो भवति - गजः अजो भवतीत्यर्थः । तव वचः वाक् प्रकाशिता चेत्, शुकः अपशुस्सन्-अपगत 'शु' कारस्सन्, मुखे अवाप्त दीर्घककारो भवति - काको भवतीत्यर्थः । तव वचने श्रुते शुकवचनं काकरूततुल्यं भवतीति भावः । तव स्तनौ प्रकाशितौस्चेत्, अगः पर्वतः अगस्सन् 'ग' कारशून्यस्सन्, अन्ततः अन्तभागे णुगो भवति 'णु' इत्यक्षरं प्राप्तो भवति । 'अणु' भवतीत्यर्थः ।

आकारशून्यं आरामं अनन्तकुशलादरम् ।
भजामि भक्त्या विमुखराधोपद्रवकारणम् ॥ 119 ॥

आकारेति - अनन्तकुशलः अन्त्याक्षर शून्यकुशलः कुश इत्यर्थः तत्र सादरं 'वि' मुखराधः विराधः तदुपद्रवकारणं आकार शून्यं आरामं - राममित्यर्थः । (कुशादरं विराधोपद्रवकारणं रामं भजामि इति)

अतिप्रसूतिर्मातास्यात् अशान्तो गिरिशोऽचलः ।
नारदोऽपि ह्यदान्तश्चेत् मर्त्यसंबन्धितां भजेत् ॥ 120 ॥

अतीति -प्रसूतिपदस्य अतित्वे - 'ति' इति वर्ण शून्यत्वे प्रसूरिति भवति । तस्मात् मातेत्युक्तं (जनयित्री प्रसूर्माता जननी-इत्यमरः) गिरिशः अशान्तश्चेत् श इत्यन्त्यवर्णशून्यश्चेत् गिरिर्भवति । तस्मार्थ अचल इत्युक्तम् । नारद इत्यस्य 'द' इति अन्त्यवर्ण - शून्यत्वे नार इति भवति । नरसंबन्धी भवतीत्यर्थः - नरसम्बन्धित्वात् नारस्य ।

लोके मध्यस्थराहित्ये धीवरोपि च पण्डितः ।
प्रेषितो ह्यद्वितीयश्चेत् शवस्यान्नाऽत्र संशयः ॥ 121 ॥

लोक इति - धीवरशब्दस्य 'व' इति मध्यस्थाक्षर - राहित्ये 'धीर' इति भवति । तस्मात् पण्डित इति उक्तम् । प्रेषित इति शब्दः द्वितीयाक्षररहितश्चेत् 'प्रेत' इति भवति । तस्मात् 'शव' इत्युक्तम् । अयं प्रकृतार्थः । न्याय्यान्य्यवादिमध्यस्थजनाभावे धीवरः पामरः अपि पण्डितो भवति । सहायरहितो जनः प्रेषितश्चेत् चोरादिभिः हतस्सन् शवो भवतीत्यर्थान्तरध्वनिरपि बोध्या ।

मोदकश्चेदकान्तोऽति प्रीत्यर्थत्वन्न मुञ्चति ।
अर्थं वदत कान्तश्चेत् पृथुरप्यर्भको भवेत् ॥ 122 ॥

मोदक इति - (मोदकः) अकान्तश्चेत्-'क' इत्यन्त्यवर्णशून्यश्चेत् मोदो भवति । तस्मात् प्रीत्यर्थत्वं न मुञ्चतीत्युक्तम् । पृथुः कान्तश्चेत् - अन्ते 'क' कारं प्राप्नोति चेत् पृथुको भवति, तस्मात् अर्भक इत्युक्तम् । पृथुकशब्दस्य अर्भकवाचकत्वात् । मोदकरूप भक्ष्यविशेषस्य अकान्तत्वेऽपि-समीचीनाकृतिराहित्येऽपि रूचिहान्य भावात् प्रीतिविषयो भवत्येव । पृथुः स्थूलशरीरोऽपि कान्तश्चेत्-रम्यश्चेत् अर्भकवत् दर्शनीयरूपो भवतीति अर्थान्तरावगतिर्बोध्या ।
कस्यचनाक्षरविन्यासे सति संगतार्थकत्वात् इदं प्रकरणम् अक्षरविन्याससरसम् इत्युक्तम् ।

## त्रयोदशप्रकरणं - साधर्म्यम्

मूषकस्य मुकुन्दस्य साधर्म्यं कीदृशं भवेत् ।
यद्विनायकवाहत्वं सखे भवतु तत्तयोः ॥ 123 ॥

मूषकस्येति-विनायकस्य वाहः विनायकवाहः तस्य भावः विनायकवाहत्वं । विनायकः गरुडः - सः वाहः यस्य स विनायकवाहः, तस्यभावः विनायकवाहत्वम् ।

मुकुन्दस्य मुमुक्षोश्च कीदृशी तु सधर्मता ।
अप्रतीकाशताया तु सा तयोस्स्यात् सधर्मता ॥ 124 ॥

मुकुन्दस्येति-अप्रतीकाशता - अनुपमत्वम् । प्रतीके - शरीरे आशा यस्य नास्ति सः अप्रतीकाशः तस्य भावः तत्ता ।

मन्मथस्य च साधोश्च साधर्म्यं कीदृशं भवेत् ।
अविग्रहत्वं साधर्म्यं उभयोरुचितं सखे ॥ 125 ॥

मन्मथस्येति - अविग्रहत्वं - अशरीरित्वं, विरोधाभावश्च ।

हंसस्य पण्डितस्यापि साधर्म्यं वक्तुमर्हत ।
अभ्रान्तचित्तताया तु तत्साधर्म्यं तयोर्भवेत् ॥ 126 ॥

हंसस्येति-अभ्रान्तचित्तता - मेघावसानमनस्कत्वम् ।हंसानां वर्षाकालविरोधात् शरत्कालैकचित्तत्वमिति भावः । भ्रान्तिरहितमनस्कत्वं च पण्डितस्य भ्रान्त्यभावात् ।

कवेर्ग्रहगणस्यापि विरक्तस्यापि संसृतौ ।
त्रयाणामपि साधर्म्थं वक्तुमर्हन्ति पण्डिताः ।
या त्वनन्तपदासक्तिस्सा त्रयाणां सधर्मता ॥ 127 ॥

कवेरिति-अनन्तेषु पदेषु प्रकृतिप्रत्ययघटितेषु आसक्तिः । अनन्तपदं-विष्णुपदं-आकाश इत्यर्थ तत्र आसक्तिः । अनन्तपदासक्तिः भगवत्चरणकमलासक्तिः । यद्वा-अनन्तपदं - परमपदं तदासक्तिरिति च ग्रहगणः सूर्यचन्द्रादि ग्रहगणः ।

## चतुर्दशप्रकरणम् - भाषान्तरभ्रमः

अत्तानेकमनुष्याणां अम्माञ्जित्वाप्तुमैक्षत ।
मदिनीचपलाशस्स रावणो हरिणा हतः ॥ 128 ॥

अत्तेति-अनेकमनुष्यशरीरभक्षकः (अत्ता) रावणः अं भगवन्तं श्रीरामं, जित्वा, मां सीतारूपिणीं लक्ष्मीं आप्तुम् ऐच्छत् । मदिनीचपलाशः सः मदोन्मत्तो नीचस्चपलाशः स रावणः तस्य आशा मनोरथः व्यर्थोऽभवत् इष्टलाभेन प्रत्युतानिष्टप्राप्त्या च इति भावः । अत्र द्राविडभाषया अत्तान् (அத்தான்) अम्माञ्चि (அம்மாஞ்ஜி) मदिनी (மதினி) इति बन्धुविशेषबोधोवधेयः ।



अप्प्रभुर्नाशमापोहा भजेयुरिति यच्छरात् ।
भीत आगत्य यं भेजे तन्नमामि रघूद्वहम् ॥ 129 ॥

अप्प्रभुरिति-अपां प्रभुः अप्प्रभुः समुद्रः, आपः स्वीयजलानि नाशं राघवशरात् शोषणं भजेयुः - हा! कष्टम् इति यच्छरात् भीतः प्रत्यक्षतां यातः । श्रीरामसन्निधिम् अवाप-तं रघूद्वहं नमामि इत्यर्थः । अत्र अप्रभुः नाशमापोहा (அப்ரபு நாசமாபோஹா) इति वाक्यात् द्रविडभाषया प्रभु व्यतिरिक्तः नाशं यात्वित्यर्थबोधो भवति ।

अरिशिक्षामतः कम्बु राहिशोळं रमापतिः ।
विश्वं पातुं ततोन्ये तु विरिञ्चाद्या न हि क्षमाः ॥ 130 ॥

अरीति-शत्रुशिक्षायां सर्वसम्मतः । कम्बुराहिशः-कम्बु शङ्खं, र आदाने शङ्खधर इत्यर्थः, अहौ सर्पे शेत इति अहिशः । कम्बुरश्चासौ अहिशश्च कम्बुराहिशः रमापतिः । विश्वं पातुम् अलं-समर्थः । शिष्टं स्पष्टम् । अरिशि (அரிசி) क्षामतः तण्डुल दारिद्रलात् कम्बु-राहि -शोलं (கம்பு, ராகி, சோளம்) इति द्राविडया धान्य विशेषबोधो भवति ।

एधो लक्ष्मी वियोगास्तु कथं वाच्यान्तरात् ।
अयुक्तसंशयो यत्र काष्ठमा विरहा इति ॥ 131 ॥

एध इति - काष्ठ - मा - विरहा: इति । एधो लक्ष्मी वियोगबोधः । वचोन्तरात् द्राविडभाषातः अयुक्तसंशयबोधो भवति घटो वा कलशो वेतिवत्-काष्ठमा विरहा (காஷ்டமா விறகா) इति संशयस्यायुक्तत्वात् । द्राविडाभाषाभ्रम जनकत्वात् एष श्लोकः अत्रोक्तः ।

काक्षमा भूषणं कुत्र धार्यते तारितः कया ।
समुद्रः कं गता लक्ष्मीः कुरङ्गे रामसेनयाम् ॥ 132 ॥

केति-कुः - अङ्गे - रामसेनया - अम् इति पदच्छेदेन प्रश्नचतुष्टयोत्तरोक्तिः । प्लवङ्गमा एव श्रीरामस्य सैन्यमिति (குரங்கே ராம சேனையாம்) द्राविड्या अर्थान्तरबोऽधोऽवगन्त्व्यः ।

नालसद्भिस्सुमैर्विष्णोः अञ्जसार्चां करोतु ताम् ।
आरुदन्तं गजं पातुं येळसास्तैरलं परैः ॥ 133 ॥

नेति-ना मनुष्यः, लसद्भिः सुमैः विष्णोरेवार्चां अञ्जसा करोतु । रूदन्तं नक्रपीडयेति भावः गजं पातुं - रक्षितुं ये अलसा; असमर्थाः तैः परैः इतरदेवैः अलं - तत्पूजा न कर्तव्येत्यर्थः । आ इत्यव्ययमाक्षेपे । कथन्तस्यैव पूजेत्याक्षेपे उत्तरार्धेन तत् परिहारे बोध्यः । अत्र नालु, अञ्जु आरू, एळु इति द्राविडसंख्याबोधो ज्ञेयः । यद्यपि ஏழு इत्येव सप्तसंख्या तथाऽपि पामरैः येळु (ஏளு) इत्यपि प्रयुज्यत इति तथोक्तम् इति अवगन्तव्यम् ।

चारु मोरु शिराश्शोरुः करिहा त्वं प्रभो कलिः ।
मामियान्मामनार्तङ्गेयगुणाच्युत चेत् क्रियाः ॥ 134 ॥

चार्विति-मोरुः (मा ऊरुः) लक्ष्मीसक्थि (सक्थि क्लीबे पुमानूरुः अमरः) सः चारुः तत्र शिरः यस्य स चारुमोरुशिराः - श्रीदेवी सक्थिस्थले शिरः निक्षिप्य शयनं करोति भगवानिति तथोक्तम् । शोरुः मङ्गळकरसक्थिद्वयः । अनेन ऊरुद्वारा दिव्यमंगळविग्रहस्य शुभाश्रयत्वम् उक्तं भवति । शकारस्य मङ्गळवाचकत्वात् । करिहा-कुवलयापीडहन्ता त्वं माम् अनार्तं क्रियाश्चेत्-करिष्यसि यदि । कलिः माम् इयात्-भजतु। त्वया मदार्तिहरणे कृते सति, कलिभयं मे नास्तीति भावः । प्रभो गेयगुण अच्युत ! इति भगवत्संबोधनं । हे प्रभो गेयगुण अच्युत । चारुमोरुशिराः शोरुः करिहा त्वं मामनार्तं क्रियाश्चेत् कलिः मामियात् इत्यन्वयः । चारु, मोरु, शोरु,करिहा, मामियार्, मामनार तङ्गे (சாரு, மோரு, சோறு, கரிஹா, மாமியார், மாமனார்) इति द्राविडशब्दबोधोऽत्र स्पष्टः ।

महानसं हरिं वाहमहिषञ्च दरिद्रताम् ।
कोपञ्च जालकं सूदो मायमोऽमोऽशमो विरैत् ॥ 135 ॥

महानसमिति - सूदः माहनसं मा हरिं यमः वाहमहिषं अमः (लक्ष्मीकटाक्षरहितः) दरिद्रः इत्यर्थः दरिद्रतां अशमः कोपं विः (पक्षी) जालकं ऐत् क्रमेणाऽन्वयः । अत्र सूदो मायमो मोशमो(சூதோ, மாயமோ, மோசமோ) इति द्राविड्या वञ्चनादिबोधो भवतीति ज्ञेयम् ।

नरि नायोऽपिशाशो वा कारणान्तरतोऽपि वा ।
वञ्चनां कुरुते हन्त तमाहुर्नरराक्षसम् ॥ 136 ॥

नरीति - यः ना-मनुष्यः शाशोऽपि वा स्वसुखेच्छो वा स्वसुखार्थं वा इति भावः । कारणान्तरतः अपि वा स्वसुख व्यतिरिक्तकारणात् वा, नरि मनुष्ये वञ्चनां कुरुते-तन्नरं सन्तः नरराक्षसम् आहुः इत्यर्थः । अत्र नरि, नाय् पिशाश् (நரி, நாய், பிசாசு) इति द्राविड्या जम्बुकश्वानपिशाचबोधः ।

वः काळोळिवदाभाति यस्य कण्ठो विषश्रिया ।
परमुण्डे विधुर्भाति स रुद्रः पातु सर्वदा ॥ 137 ॥

व इति - यस्य कण्ठः विषश्रिया कालः असितः सन् अळिवत् आभाति, यस्य परमुण्डे गंगातीर्थवत्वात् पुण्ये शिरसि विधुः (चन्द्रः) भाति । स रुद्रः वः सर्वदा पातु इत्यर्थः । अत्र वःकाळेळि, परमुण्डे इति द्रविड्या निन्दा प्रतीयते ।

भीतो यदि स्यादविशारिदण्डात् अम्मामियात्तिल्यमहीरुहाद्यैः ।
संशोभितं नित्यपदं स गच्छेत् मामात्र सन्देहलवो मदुक्तौ ॥ 138 ॥

भीत इति-अवौ शेत इत्यविशः रुद्रः (अविः गिरिः) सः अरिः शत्रुः यस्य सः अविशारिः यमः, तत्दण्डात्

तत्कर्तृकशिक्षातः, पुमान् भीतः स्यात् यदि, अं भगवन्तं मां-लक्ष्मीं च इयात् अनन्तरं स पुमान् तिल्योवृक्ष इत्यादिश्रुतिप्रसिद्धतिल्यवृक्षादिभिः संशोभितं परमपदं गच्छेत् । अत्र मदुक्तौ सन्देहलवोऽपि मा मा-मास्त्वित्यर्थः । यमदण्डनभयात् लक्ष्मीं पुरुषकारत्वेन भगवन्तम् उपायत्वेन प्रपद्येत चेत् मुक्तो भवत्येवेति भावः । अत्र अविशारि दण्डं अम्मामियात्तिल् मामा (அவிசாரி, தண்டம், அம்மாமியாத்தில், மாமா) इति द्राविडशब्दबोधः ।
(विरजा नदी तिल्यो वृक्षः सालज्यं संस्थानं इन्द्रप्रजापती द्वारगोपौ इति कौषितक्य उपनिषदि मुक्तिप्रदनिर्णये)

अप्पं मनोहरं तेङ्गासमश्रीर्जयति प्रभो ।
एनो करोद्दयातेनो सत्तुमा पच्चमावतु ॥ 139 ॥

अप्पमिति-प्रभो हे नारायण ! ते तव अङ्गासमश्रीः - शरीर निस्तुलश्रीः मनोहरं मनोज्ञम् । अपः पातीति अप्पः मेघः तं जयति । ते दया तु नः एनः - पापं - असत् तुच्छमकरोत् । तव पच्च चरणश्च (पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् - अमरः) मा-माम् अवतु-रक्षतु इत्यर्थः । अस्माभिः शरणत्वेन व्रतस्तव चरणः काळमेघाधिकसुन्दर त्वदीयदिव्यमङ्गळविग्रहसेवाप्रदानेन अस्मान् रक्षत्विति भावः । अत्र अप्प-मनोहरं - तेङ्गा एनो तेनो सत्तुमा पच्चमा (அப்பம், மனோஹரம், தேங்கா, ஏனோ, தேனோ, ஸத்துமா, பச்சமா) इति द्राविडशब्दबोधः ।

## पंञ्चदश प्रकरणं - शब्दगूढम्

करोतु मह्यं हन्ता चेदीशस्य दयया सुखम् ।
विद्वांसोऽपि विमुह्यान्ति व्यक्ते हननकर्मणि ॥ 140 ॥

करोत्विति - चेदीशस्य शिशुपालास्य हन्ता-कृष्णः अत्र, चेत् ईशस्य इति पदच्छेदभ्रमात् चेदीशस्येति शीघ्रमप्रतीत्या कर्मपदम् ।

आपदर्थं हि संख्यावान् गृहं क्षेत्रं च पार्थिवात् ।
विद्वानेव विजानाति गूढमत्र क्रियापदम् ॥ 141 ॥

आपदिति- विद्वान् भूपात् गृहं क्षेत्रं अर्थं च आपत् प्राप । अत्र आपदिति पदच्छेदस्य स्फुटम् अप्रतीतिरिति भावः ।

उदारास्तादृशाः पान्तु युष्मान्तत्भक्तिशालिनः ।
विशेषपदमत्रत्यं वक्तुं शक्तो न गीष्पतिः ॥ 142 ॥

उदारा इति । तादृशाः सर्वगुणपूर्णाः उदाराः उः शम्भुः तस्य दाराः पार्वतीत्यर्थः युष्मान् रक्षमु ।



विदुरस्य च कृष्णस्य रामस्य मुनिसत्तमाः ।
माहात्म्यं न विजानन्ति कवयोऽत्र क्रियापदम् ॥ 143 ॥
विदुरिति । अस्य कृष्णस्य रामस्य च माहात्म्यं मुनिसत्तमाः विदुः [ विदुः + अस्य = विदुरस्य ]

द्विजैरेव सखे बालो दशदिक्षु मनोगतम् ।
क्रियां कर्म च विद्वांसो न जानन्त्यत्र माहिताः ॥ 144 ॥
द्विजैरिति । बालः अनोगतं-शकटस्थं इक्षुं द्विजैरेव=दन्तैरेव अदशत् ।
(बालोऽदशादिक्षु=बालः अदशत्+इक्षु) (दन्तविप्राण्डजाः द्विजा इत्यमरः)

अस्त्रं पाशुपतं भक्त्या याचते सव्यसाचिने ।
रुद्रेण किं कृतं ब्रूहि दत्तमत्रैव चोत्तरम् ॥ 145 ॥
अस्त्रमिति । किं कृतं ? दत्तम् । अत्र उत्तरं दत्तं-दत्तमिति पदमेवोत्तरवाचकमित्यर्थः । सव्यसाची-अर्जुनः ।

दुर्लभं देवतानाञ्च भाग्यं लोके विराजते ।
यत्त्वं भगवतः पत्रमर्थं वदत पण्डिताः ॥ 146 ॥
दुर्लभमिति । हे विराजः ते भाग्यं देवानामपि दुर्लभं स्यात् यस्मात् त्वं भगवतो वाहनभूतः तस्मादित्यर्थः ।

मधुरावयमाम्राणां पल्लवैः कोकिलस्य सः ।
पञ्चमो वञ्चयन् धैर्यं पान्थानां समुदञ्चति ॥ 147 ॥
मधुरिति । यं मधुः वसन्तकालः आम्राणां मल्लवैः आव-ररक्ष, सः कोकिलस्य पञ्चमः पञ्चमस्वरं धैर्यं वञ्चयन् समुदञ्चति-मारपीडा जनकत्वात् ।

ज्ञानाधिका अपि प्रायो जीवन्ति क्लेशतो गृहे ।
वयोधिकाननम्यापयन्ति कालं सुखेन हि ॥ 148 ॥
ज्ञानेति । ज्ञानाधिका अपि - विद्वांसोऽपि क्लेशतः- जीवनोपाय संपादनक्लेशेन गृहे जीवन्ति । वयः पक्षिणस्तु अधिकाननं - वने, कालं सुखेन अनायासेन - यापयन्ति ।

भूयात् बाल सदाऽयुष्मत्तात इत्येव मे मतिः ।
अत्र कर्तृपदं वक्तुं अवधिब्रह्मणोवयः ॥ 149 ॥
भूयादिति । हे बाल ! ते आयुष्मत्ता भूयात् इति सदैव मे मतिः ।

साध्वसेनचकम्पेनरोगजेनावलोकितः ।
एतद्वाक्यस्य जानाति योऽर्थं स खलु पण्डितः ॥ 150 ॥

साध्वसेनेति। नरः गजेनावलोकितः सन् साध्वसेन चकम्पें । गजाक्रमण-शङ्कया भीत्या कम्पं प्रापेत्यर्थः ।

बाले वदनबिम्बं ते तमीनं धिक्करोति हि ।
त्वदक्षियुगळञ्चाऽपि तमेवाऽनादिमत्भुतम् ॥ 151 ॥

बालइति । ते वदनबिम्बं तमीनं - चन्द्रं धिक्करोति । त्वदक्षियुगळं चापि अनादिम् - आद्यक्षरशून्यं तमेव-तमीनमेव-मीनमित्यर्थः धिक्करोति। द्वयोः एकवस्तुधिक्कारात् आश्चर्यमिति भावः ।

भीमार्जुनवधः कार्यः कौरवाणां रणाङ्कणे ।
धर्मो यं नकुलं पश्येरित्याह हरिरर्जुनम् ॥ 152 ॥

भीमेति । हे अर्जुन कौरवाणां वधः कार्यः कर्तव्यः । भीः - पापं भवेदिति भयं मास्तु । अयं शत्रुवधः धर्मः क्षत्रियाणाम् अवश्यानुष्ठेय धर्मः, कुलं न पश्येः । अस्मत्कुलीनानां पितामह पितृ-भ्रातृ-पुत्रादि-रूपाणां वधं कथं कुर्याम् इति न मन्वीथा इति भावः ।

विश्वामित्रो वसिष्ठश्च वेदव्यासः पराशरः ।
विदुरः परमात्मेति गूढमत्र क्रियापदम् ॥ 153 ॥

विश्वेति । (विदुः+अः = विदुरः) अः विष्णुरेव परमात्मा - परदैवतमिति विश्वामित्रः वसिष्ठश्च वेदव्यासः पराशरश्च एते विदुः ।

विपिने वटवृक्षस्य फलव्रातो विनाशितः ।
अत्र कर्तृपदं जानन् प्रोच्यते पण्डितोत्तमः ॥ 154 ॥

विपिन इति । वटवृक्षस्य फलव्रातः विना-पक्षिणा, विपिने-वने अशितः भक्षितः । कर्ता तु विः - पक्षि ।

पनसादिफलव्रातो नदत्भिर्विहगैर्वने ।
खाद्यते कठिनत्वात्तु किमत्र करणं वद ॥ 155 ॥

पनसैति । पनसादिफलगणः कठिनत्वात् जम्बवादिफलवत् मार्दवा-भावात् विहगैः दत्भिः = दन्तैः न, खाद्यते । अत्र दत्भिरिति पदं करण- वाचकम् ।

कावार्ता मनुजादिव्यादित्यादित्याधिपादयः ।
देवा दशाननेनेति जातो दाशरथिर्हरिः ॥ 156 ॥

कोवेति । कौ-भूमौ (कावार्ता = कौ आर्ताः) मनुजाः, दिवि - आदित्याधिपादयः = सूर्येन्द्रादयो देवाः दशाननेन आर्ताः पीडिताः इत्यालोच्य हरिः दाशरथिः जातः - दशरथात् जज्ञे ।

आप्तोपदेशात् कुशिकस्य सूनोः अस्त्राणि राजन् ! तव सूनुरित्थम् ।
उक्तेऽप्ययं पङ्क्तिरथो हि भावि-क्रिया विमूढात्मतयाप मोहम् ॥ 157 ॥

आप्तेति । हे राजन् ! तव सूनुः राघवः कुशिकस्य सूनोः विश्वामित्रस्य उपदेशात्, अस्त्राणि - अस्त्रमन्त्रान् आप्ता - प्राप्स्यति इति वसिष्टादिभिः उक्तेऽपि, पङ्क्तिरथः भविष्यत्क्रियाविमूढात्मतया - विश्वामित्रलब्धास्त्रादिबलात् रामकर्तृकताटकारिक्षोवध - धनुर्भङ्गादि रूपभाविक्रियाज्ञानाभावात् मोहमाप । बालं रामं कथं प्रेषयिष्य इति मोहं दशरथः प्रापेति भावः । भविष्यत्क्रिया विमूढेत्यनेन -भविष्यदर्थवाचकस्य आप्तेति क्रियापदस्य शीघ्रमप्रतीतिरपि ।

वने बहूनान्जन्तूनां आशयाङ्गान्यनेकशः ।
ताटका सा हता विद्वन् गूढमत्र क्रियापदम् ॥ 158 ॥

वन इति । बहूनां जन्तूनां अङ्गान्यनेकशः या आश-जघास, सा ताटकाऽपि हता रामेण इति शेषः ।

पितुराज्ञावशाद्रामः सुग्रीवोरावणाशयः ।
अङ्गदादिकमुज्झित्वा सीतान्नीत्वा ययौ द्रुतम् ॥ 159 ॥

पितुरिति । सुग्रीवोराः - शोभनग्रीववक्षःस्थलः रामः, पितुः आज्ञावशात्, वनाशय = वनं जिगमिषुः अङ्गादिकं - भूषणजातं त्यक्त्वा सीतया सह वनं ययौ इत्यर्थः ।

पादचारी माहरण्ये सीतया लक्ष्मणेन च ।
बहुपादो जटीक्षीरात् राघवोऽभूत् सवल्कलः ॥ 160 ॥

पादेति । महारण्ये सीतालक्ष्मणाभ्यां सह पादचारी सवल्कलः राघवः बहुपादः = वटवृक्षस्य क्षीरात् जटी कृतजटः अभूत् । अत्र बहुपाद इत्यनेन पदेन वटरूपार्थं स्फुटं न प्रतीरयत (?) इति भावः । न्यग्रोदो बहुपाद वट इत्यमरः ।

रामलक्ष्मणयोर्दिव्यसौन्दर्यस्य विलोकनात् ।
वैदेहीं दुस्सहावस्थां पुनश्शूर्पणखी गता ॥ 161 ॥

रामेति । वैदेहीं = विदेहजातां - मन्मथजातां इत्यर्थः । दुस्सहावस्थां शूर्पनखी गता - प्राप ।

रक्षोहतां विना सीतां जानन् रामो न केवलम् ।
पर्यतप्यत शोकेन विदेहञ्च ददाह सः ॥ 162 ॥

रक्ष इति । रामः सीतां रक्षोहतां - रावणेन हतां, विना = जटायुना जानन्, स्वयं न केवलं पर्यतप्यत । किन्तु विदेहमपि (वि+देहं) रावणहत जटायुदेहमपि अदहत् ।